10.08.19

# Sahityadarpana (SB Ma'am)

(*) लक्षणा विवेचिताम — 'एते कुन्ताः प्रविशन्ति'। द्वितीय परिच्छेदे उपलभ्यते =
'एते कुन्ताः प्रविशन्ति' इति वाक्यं विश्वनाथकविराजेन विरचित साहित्यदर्पणस्थं

**Ans:** प्रयोजनमूलकाया: सारोपा उपादानलक्षणाया उदाहरणम् इदम्।
अस्मिन् वाक्ये 'कुन्ता' इति अप्राणिवाचकशब्देन सह प्रविशन्ति:
इति क्रियावाचकपदस्य अन्वयाभावात् मुख्यार्थबाधः। तद-
नन्तरम् कुन्ता इत्यत्र कुन्तशब्देन सह संयुक्ता कुन्त-
धारिणः पुरुषाः इति लक्ष्यार्थौ गृह्यते। अतिघनक-
त्वम् अत्र प्रयोजनम्। अतः वाक्येऽस्मिन् लक्षणाया
लक्षणसंगति दृश्यते। लक्षणाया लक्षणं यथा विश्वनाथ-
कविराजै उच्यते —

मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता॥

वाक्येऽस्मिन् कुन्ता इति मुख्यार्थस्य
उपादानात् एषा उपादानलक्षणा भवति। तल्लक्षणा यथा —

मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा॥

तत्रस्य वाक्येऽस्मिन् विषयिणा लक्ष्यार्थेण
विषयस्य मुख्यार्थस्य अनिगीर्णत्वात् एषा सारोपालक्षणा
इति भवति। सारोपालक्षणाया लक्षणं यथा विश्वनाथ-
कविराजेन एवं निदर्शते —

विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्।
सारोपा, स्यान्निगीर्णस्य मता साध्यवसानिका॥

10.05.17. Sahityadarpana (SB Mam)

अस्मिन् उदाहरणे एते इति सर्वनामपद-ग्रहणेन कुन्तधारिपुरुष निर्देशात् सारोपात्वं इति शम् अलं विस्तारेण।

⊛ अश्वः श्वेतो धावति।

→ रूढिमूलकायाः सारोपा शुद्धा उपादानलक्षणाया उदाहरणम् इदम्। 'अश्वः श्वेतो धावति' इति वाक्यम् विश्वनाथ-कविराजेन विरचित साहित्यदर्पणस्य द्वितीय परिच्छेदे उपलभ्यते। श्वेत पदस्य मुख्यार्थः वर्णविशेषः। वर्णविशेषस्य अचेतनत्वात् धावनं न सम्भवति। अतः मुख्यार्थबाधः। श्वेत इति पदेन लक्षणाद्वारा श्वेतगुणयुक्तः अश्वः बोध्यते। अत्र लक्ष्यार्थेन सह मुख्यार्थमपि प्राप्यते। अतः उपादानलक्षणा। श्वेत इति विषयिणा अश्वरूपः विषयः अनिगीर्णः अर्थात् तिरस्कृतो न भवति। अत एव सारोपा। मुख्यार्थलक्ष्यार्थयोः मध्ये सादृश्येतरः संयोगसम्बन्धः। अतः शुद्धा लक्षणा। प्रयोजनाभावात् रूढिमूला लक्षणा एव।

⊛ कलिङ्गः पुरुषो युध्यते।

⇒ 'कलिङ्गः पुरुषो युध्यते' इति वाक्यं साहित्यदर्पनस्य द्वितीयपरिच्छेदे विश्वनाथकविराजेन रूढिमूला सारोपा शुद्धा लक्षणलक्षणाया उदाहरणत्वेन गृहीतम् अस्ति। अत्र कलिङ्गः पदमभिधया देशविशेषमेव बोधयति। परन्तु अचेतनदेशः चेतनपुरुषेण सह विशेषणविशेष्यभावे

अन्वितो न भवति, अतः मुख्यार्थबाधः। मुख्यार्थबाधे लक्षणाद्वारा कलिङ्गशब्दः तद् देशीय पुरुषमेव बोधयति। वाक्यार्थान्वय सिद्धौ कलिङ्ग-शब्दः मुख्यार्थं त्यजति इत्येव लक्षणलक्षणा। पुरुषः इति विषयः अनिगीर्णत्वात् सारोपा। कलिङ्ग-पुरुषयोः सादृश्येतरः अर्थात् आधाराधेय एव भावः। अतः शुद्धालक्षणा। किञ्च देशवाचककलिङ्ग इति शब्दः तत् देशीय पुरुषे प्रसिद्धिवशादेव प्रयुज्यते। अतः प्रयोजनाभावादेव अत्र रूढिमूला लक्षणा स्यात्।

* - श्वेतो धावति।

→ 'श्वेतो धावति' इति वाक्यं साहित्यदर्पणस्य द्वितीय-परिच्छेदे विश्वनाथकविराजेन रूढौ उपादानलक्षणाया उदाहरणत्वेन गृहीतम् अस्ति। अत्र श्वेत इति पदम् अप्राणीवाचकं श्वेतवर्णबोधकं च। धावति इति पदञ्च धावन क्रिया प्रख्यापकं च। वाक्येऽस्मिन् श्वेतपदस्य अचेतनत्वात् धावति इति क्रियावाचकपदेन सह अनन्वयासंभवात् मुख्यार्थभावः। तदनन्तरम् अत्र श्वेतपदेन 'श्वेतवर्णयुक्तेन अश्व' इति मुख्यार्थयुक्ता अपरोऽर्थः गृह्यते। वर्णवाचकपदेन तद् वर्णयुक्तस्य प्राणिना अवस्थिति ग्रहणं तु रूढिसहायेन भवति। अनेन अस्मिन् उदाहरणे लक्षणायाः वैशिष्ट्यजातम् सुनिर्दिष्टम्। उक्तं च लक्षणलक्षणा यथा——

"मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥"

तथा च अत्र लक्षार्थग्रहणे मुख्यार्थसंबन्धी अश्वरूपोऽर्थः आक्षिप्यते। अतः अत्र उपादानलक्षणायाः लक्षणासिद्धिः। तल्लक्षणं यथा —

"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा॥"

अत्र प्रयोजनाभावादेव लक्षणा रूढिमूला स्यात्।

⊛ आयुर्घृतम्।

→ 'आयुर्घृतम्' इति वाक्यं साहित्यदर्पणस्य द्वितीये परिच्छेदे विश्वनाथकविराजेन प्रयोजनमूला सारोपा शुद्धा लक्षणलक्षणा उदाहरणत्वेन गृहीतम् अस्ति। आयुः दीर्घजीवनम्। तस्य कारणं घृतम्। आयुः कार्यम्। एवं विषयस्य तथा विषयिणः मध्ये कार्यकारणसम्बन्ध। अतः शुद्धालक्षणा। घृतपदस्य साक्षात् प्रयोगात् अर्थात् विषयस्य अनिगीर्णत्वात् सारोपा। अन्येभ्यः घृतभिन्नपदार्थेभ्यः इदं घृतं विलक्षणतया प्रदर्शित। एतदेव अत्र लक्षणाप्रयोगे प्रयोजनम्। अतः प्रयोजनमूला। आयुः इति पदस्य मुख्यार्थः अत्र परित्यज्यते। अतः लक्षणलक्षणा।